॥ श्रीगुरुभ्यो नमः ॥

कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

पञ्चमकाण्डे द्वितीयः प्रश्नः

चित्युपक्रमाभिधानं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

विष्णुमुखा वै देवा श्छन्दोभिरिमाँल्लोकाननपजय्यमभ्यजयन्यद्विष्णुक्रमान् क्रमते विष्णुरेव
भूत्वा यजमान श्छन्दोभिरिमान् लोकाननपजय्यमभि जयति विष्णोः क्रमोऽस्यभिमातिहेत्याह
गायत्री वै पृथिवी त्रैष्टुभमन्तरिक्षञ्जागती द्यौरानुष्टुभीर् दिश श्छन्दोभिरेवेमाँल्लोकान्यथापूर्व-
मभि जयति प्रजापतिरग्निमसृजत सोऽस्मात् सृष्टः ॥ [१] ॥ पराङैत् तमेतयाऽन्वैदक्रन्द-
दिति तया वै सोऽग्नेः प्रियन्धामावारुन्ध यदेतामन्वाहाग्नेरेवैतया प्रियन्धामाऽव रुन्ध ईश्वरो वा
एष पराङ् प्रदघो यो विष्णुक्रमान् क्रमते चतसृभिरा वर्तते चत्वारि छन्दाꣳसि छन्दाꣳसि खलु
वा अग्नेः प्रिया तनूः प्रियामेवास्य तनुवमभि ॥ [२] ॥ पर्यावर्तते दक्षिणा पर्यावर्तते स्वमेव
वीर्यमनु पर्यावर्तते तस्माद्दक्षिणोऽर्द्ध आत्मनो वीर्यावत्तरोऽथो आदित्यस्यैवाऽऽवृतमनु पर्या-
वर्तते शुनश्शेपमाजीगर्तिँव्वरुणोऽगृह्णात् स एतांव्वारुणीमपश्यत् तया वै स आत्मानँव्वरुणपा-
शादमुञ्चद्वरुणो वा एतङ्गृह्णाति य उखाम्प्रतिमुञ्चत उदुत्तमँव्वरुणपाशमस्मदित्याहाऽऽत्मानमे-
वैतया ॥ [३] ॥ वरुणपाशान् मुञ्चत्या त्वाऽहार्षमित्याहाऽऽह्येनꣳ हरति ध्रुवस्तिष्ठाऽविचा-
चलिरित्याह प्रतिष्ठित्यै विशस्त्वा सर्वा वाञ्छन्त्वित्याह विशैवैनꣳ समर्द्धयत्यस्मिन् राष्ट्रमधि
श्रयेत्याह राष्ट्रमेवास्मिन् ध्रुवमकर् यङ्कामयेत राष्ट्रꣳ स्यादिति तम्मनसा ध्यायेद्राष्ट्रमेव भवत्य
॥ [४] ॥ ग्रे बृहन्नुषसामूर्द्ध्वो अस्थादित्याहाऽग्रमेवैनꣳ समानानाङ्करोति निर्जग्मिवान् तमस
इत्याह तम एवास्मादप हन्ति ज्योतिषाऽऽ*गादित्याह ज्योतिरेवास्मिन् दधाति चतसृभिः साद-

यति चत्वारि छन्दांꣳसि छन्दोभिरेवाऽतिच्छन्दसोत्तमया वर्ष्म वा एषा छन्दसाँय्यदतिच्छन्दा वर्ष्मैवैनꣳ समानानाङ्करोति सद्वती ॥ [५] ॥ भवति सत्त्वमेवैनङ्गमयति वात्सप्रेणोप तिष्ठत एतेन वै वथ्सप्रीर् भालन्दनोऽग्नेः प्रियन्धामावारुन्धाग्नेरेवैतेन प्रियन्धामाव रुन्ध एकादशम्भ-वत्येकधैव यजमाने वीर्यन्दधाति स्तोमेन वै देवा अस्मिँल्लोक आर्ध्नुवन् छन्दोभिरमुष्मिन्थ् स्तोमस्येव खलु वा एतद्रूपय्ँयद्वाथ्सप्रय्ँयद्वाथ्सप्रेणोपतिष्ठत ॥ [६] ॥ इममेव तेन लोकमभि जयति यद्विष्णुक्रमान् क्रमतेऽमुमेव तैर् लोकमभि जयति पूर्वेद्युः प्र क्रामत्युत्तरेद्युरुप तिष्ठते तस्माद्योगेऽन्यासाम्प्रजानाम्मनः ख्षेमेऽन्यासान्तस्माद्यायावरः ख्षेम्यस्येशे तस्माद्यायावरः ख्षेम्यमद्ध्यवस्यति मुष्टी करोति वाचय्ँयच्छति यज्ञस्य धृत्यै ॥ [७] ॥

(सृष्टौ (१)भ्यें तया भवतिसद्वत्युपतिष्ठते द्विचत्वारिꣳशच्च) ॥ १ ॥

अन्नपतेऽन्नस्य नो देहीत्याहाग्निर्वा अन्नपतिः स एवास्मा अन्नम्प्र यच्छत्यनमीवस्य शुष्मिण इत्याहायख्ष्मस्येति वावैतदाह प्र प्रदातारन्तारिष ऊर्जन्नो धेहि द्विपदे चतुष्पद इत्याहाऽऽशि-षमेवैतामा शास्त उदु त्वा विश्वे देवा इत्याह प्राणा वै विश्वे देवाः ॥ [८] ॥ प्राणैरेवैनमुद् यच्छतेऽग्ने भरन्तु चित्तिभिरित्याह यस्मा एवैनञ्चित्तायोद्यच्छते तेनैवैनꣳ समर्द्धयति चतसृभिरा सादयति चत्वारि छन्दांꣳसि छन्दोभिरेवातिच्छन्दसोत्तमया वर्ष्म वा एषा छन्दसाँय्यदतिच्छन्दा वर्ष्मैवैनꣳ समानानाङ्करोति सद्वती भवति सत्त्वमेवैनङ्गमयति प्रेदग्ने ज्योतिष्मान् ॥ [९] ॥ याहीत्याह ज्योतिरेवास्मिन् दधाति तनुवा वा एष हिनस्ति यꣳ हिनस्ति मा हिꣳसीस्तनुवा प्रजा इत्याह प्रजाभ्य एवैनꣳ शमयति रख्षांꣳसि वा एतद्यज्ञꣳ सचन्ते यदन उथ्सर्जत्यक्रन्ददित्य-न्वाह रख्षसामपहत्या अनसा वहन्त्यपचितिमेवास्मिन् दधाति तस्मादनस्वी च रथी चातिथी-नामपचिततमा ॥ [१०] ॥ वपचितिमान् भवति य एवव्ँवेद समिधाऽग्निन्दुवस्यतेति घृतानुषि-क्तामवसिते समिधमा दधाति यथाऽतिथय आगताय सर्पिष्वदातिथ्यङ्क्रियते तादृगेव तद्गायत्रिया ब्राह्मणस्य गायत्रो हि ब्राह्मणस्त्रिष्टुभा राजन्यस्य त्रैष्टुभो हि राजन्योऽप्सु भस्म प्र वेशयत्यप्सु-योनिर् वा अग्निः स्वामेवैनय्ँयोनिङ्गमयति तिसृभिः प्र वेशयति त्रिवृद् वा ॥ [११] ॥ अग्निर् यावानेवाग्निस्तम्प्रतिष्ठाङ्गमयति परा वा एषोऽग्निव्ँवपति योऽप्सु भस्म प्रवेशयति ज्योतिष्मती-

भ्यामव दधाति ज्योतिरिवास्मिन् दधाति द्वाभ्याम्प्रतिष्ठित्यै परा वा एष प्रजाम्पशून्वपति योऽप्सु भस्म प्रवेशयति पुनरूर्जा सह रय्येति पुनरुदैति प्रजामेव पशूनात्मन् धत्ते पुनस्त्वाऽऽदित्या ॥ [१२] ॥ रुद्रा वसवः समिन्धतामित्याहैता वा एतन्देवता अग्रे समैन्धत ताभिरेवैनꣳ समिन्धे बोधा स बोधीत्युप तिष्ठते बोधयत्येवैनन्तस्माथ् सुप्त्वा प्रजाः प्र बुद्ध्यन्ते यथास्थानमुप तिष्ठते तस्माद्यथास्थानम्पशवः पुनरेत्योप तिष्ठन्ते ॥ [१३] ॥

(वै विश्वे देवा ज्योतिष्मा नपचिततमौ त्रिवृद्धा आदित्या द्विचत्वारिꣳशच्च) ॥ २ ॥

यावती वै पृथिवी तस्यै यम आधिपत्यम्परीयाय यो वै यमन्देवयजनमस्या अनिर्याच्या-ग्निञ्चिनुते यमायैनꣳ स चिनुतेऽपेतेत्यद्ध्यवसाययति यममेव देवयजनमस्यै निर्याच्याऽऽत्म-नेऽग्निञ्चिनुत इष्वग्रेण वा अस्या अनामृतमिच्छन्तो नाविन्दन् ते देवा एतद् यजुरपश्यन्नपेतेति यदेतेनाध्यवसाययत्य ॥ [१४] ॥ नामृत एवाग्निञ्चिनुत उद्धन्ति यदेवास्या अमेद्ध्यन्तदप हन्त्यपोऽवोक्षति शान्त्यै सिकता नि वपत्येतद् वा अग्नेर् वैश्वानरस्य रूपꣳ रूपेणैव वैश्वा-नरमव रुन्ध ऊषान् नि वपति पुष्टिर् वा एषा प्रजननँय्यदूषाः पुष्ट्यामेव प्रजननेऽग्निञ्चिनुतेऽथो संज्ञान एव संज्ञानꣳ ह्येतत् ॥ [१५] ॥ पशूनाँय्यदूषा द्यावापृथिवी सहाऽऽस्तान्ते वियती अब्रूतामस्त्वेव नौ सह यज्ञियमिति यदमुष्या यज्ञियमासीत् तदस्यामदधात् त ऊषा अभवन्य-दस्या यज्ञियमासीत् तदमुष्यामदधात् तदद श्चन्द्रमसि कृष्णमूषान् निवपन्नदो ध्यायेद् द्यावापृ-थिव्योरेव यज्ञियेऽग्निञ्चिनुतेऽयꣳ सो अग्निरिति विश्वामित्रस्य ॥ [१६] ॥ सूक्तम्भवत्येतेन वै विश्वामित्रोऽग्नेः प्रियन्धामावारुन्धाग्नेरेवैतेन प्रियन्धामाव रुन्धे छन्दोभिर् वै देवाः सुवर्गँल्लोक-मायन् चतस्रः प्राचीरुप दधाति चत्वारि छन्दाꣳसि छन्दोभिरेव तद्यजमानः सुवर्गँल्लोकमेति तेषाꣳ सुवर्गँल्लोकँय्यतान्दिशः समव्लीयन्त ते द्वे पुरस्तात् समीची उपादधत द्वे ॥ [१७] ॥ पश्चाथ् समीची ताभिर् वै ते दिशोऽदृꣳहन्यद् द्वे पुरस्ताथ् समीची उपदधाति द्वे पश्चाथ् समीची दिशाँव्विधृत्या अथो पशवो वै छन्दाꣳसि पशूनेवास्मै समीचो दधात्यष्टावुप दधात्यष्टाक्षरा गायत्री गायत्रोऽग्निर् यावानेवाग्नि स्तञ्चिनुतेऽष्टावुप दधात्यष्टाक्षरा गायत्री गायत्री सुवर्गँल्लोक-मञ्जसा वेद सुवर्गस्य लोकस्य ॥ [१८] ॥ प्रज्ञात्यै त्रयोदश लोकंपृणा उप दधात्येकविꣳशतिः

सम्पद्यन्ते प्रतिष्ठा वा एकविꣳशः प्रतिष्ठा गार्हपत्य एकविꣳशस्यैव प्रतिष्ठाङ्गार्हपत्यमनु प्रति
तिष्ठति प्रत्यग्निं चिक्यान स्तिष्ठति य एवव्ँवेद पञ्चचितीकञ्चिन्वीत प्रथमञ्चिन्वानः पाङ्क्तो यज्ञः
पाङ्क्ताः पशवो यज्ञमेव पशूनव रुन्धे त्रिचितीकञ्चिन्वीत द्वितीयञ्चिन्वान स्त्रय इमे लोका एष्वेव
लोकेषु ॥ [१९] ॥ प्रति तिष्ठत्येकचितीकञ्चिन्वीत तृतीयञ्चिन्वान एकधा वै सुवर्गो लोक एक-
वृतैव सुवर्गँल्लोकमेति पुरीषेणाभ्यूहति तस्मान्माꣳसेनास्थि छन्नन्न दुश्चर्मा भवति य एवव्ँवेद पञ्च
चितयो भवन्ति पञ्चभिः पुरीषैरभ्यूहति दश सम्पद्यन्ते दशाक्षरा विराडन्नव्ँविराड् विराज्येवा-
न्नाद्ये प्रति तिष्ठति ॥ [२०] ॥

(अद्ध्यवसाययति ह्येतद् विश्वामित्रस्या दधत द्वेलोकस्यलोकेषुसप्तचत्वारिꣳशच्च) ॥ ३ ॥

वि वा एतौ द्विषाते यश्च पुराऽग्निर् यश्चोखायाꣳ समितमिति चतसृभिः सन्नि वपति चत्वारि
छन्दाꣳसि छन्दाꣳसि खलु वा अग्नेः प्रिया तनूः प्रिययैवैनौ तनुवा सꣳ शास्ति समितमि-
त्याह तस्माद् ब्रह्मणा क्षत्रꣳ समेति यथ् संन्युप्य विहरति तस्माद् ब्रह्मणा क्षत्रव्ँव्येत्यृ-
तुभिर् ॥ [२१] ॥ वा एतन्दीक्षयन्ति स ऋतुभिरेव विमुच्यो मातेव पुत्रम्पृथिवी पुरीष्य-
मित्याहर्तुभिरेवैनन्दीक्षयित्वर्तुभिर् वि मुञ्चति वैश्वानर्या शिक्यमा दत्ते स्वदयत्येवैनन्नैरृतीः
कृष्णास्तिस्रस्तुषपक्वा भवन्ति निरृत्यै वा एतद्भागधेयय्ँयत् तुषा निरृत्यै रूपङ्कृष्णꣳ रूपे-
णैव निरृतिन्निरवदयत इमान्दिशय्ँयन्त्येषा ॥ [२२] ॥ वै निरृत्यै दिख स्वायामेव दिशि
निरृतिन्निरवदयते स्वकृत इरिण उप दधाति प्रदरे वैतद् वै निरृत्या आयतनङ्स्व एवाऽऽय-
तने निरृतिन्निरवदयते शिक्यमभ्युप दधाति नैरृतो वै पाशः साक्षादेवैनन्निरृतिपाशान्
मुञ्चति तिस्र उप दधाति त्रेधाविहितो वै पुरुषो यावानेव पुरुषस्तस्मान्निरृतिमव यजते परा-
चीरुप ॥ [२३] ॥ दधाति पराचीमेवास्मान् निरृतिम्प्र णुदतेऽप्रतीक्षमायन्ति निरृत्या
अन्तर्हित्यै मार्जयित्वोप तिष्ठन्ते मेद्ध्यत्वाय गार्हपत्यमुप तिष्ठन्ते निरृतिलोक एव चरित्वा
पूता देवलोक मुपावर्तन्त एकयोप तिष्ठन्त एकधैव यजमाने वीर्यन्दधति निवेशनः सङ्गमनो
वसूनामित्याह प्रजा वै पशवो वसु प्रजयैवैनम्पशुभिः समर्द्धयन्ति ॥ [२४] ॥

(ऋतुभि रेषा पराचीरुपा ष्टाचत्वारिꣳशच्च) ॥ ४ ॥

पुरुषमात्रेण वि मिमीते यज्ञेन वै पुरुषः संमितो यज्ञपरुषैवैनव्वि मिमीते यावान् पुरुष ऊद्र्ध्वबाहुस्तावान् भवत्येतावद् वै पुरुषे वीर्यँव्वीर्येणैवैनव्वि मिमीते पख्षी भवति न ह्यपख्षः पतितुमर्हत्यरत्निना पख्षौ द्राघीयाꣳसौ भवतस्तस्मात् पख्षप्रवयाꣳसि वयाꣳसि व्याममात्रौ पख्षौ च पुच्छञ्च भवत्येतावद् वै पुरुषे वीर्यं ॥ [२५] ॥ व्वीर्यसंमितो वेणुना वि मिमीत आग्नेयो वै वेणुः सयोनित्वाय यजुषा युनक्ति यजुषा कृषति व्यावृत्त्यै षड्गवेन कृषति षड् वा ऋतव ऋतुभिरेवैनङ्कृषति यद् द्वादशगवेन सँव्वथ्सरेणैवेयँव्वा अग्नेरतिदाहादबिभेथ् सैतद् द्विगुणमपश्यत् कृष्टञ्चाकृष्टञ्च ततो वा इमान्नात्यदहद्यत् कृष्टञ्चाकृष्टञ्च ॥ [२६] ॥ भवत्यस्या अनतिदाहाय द्विगुणन्त्वा अग्निमुद्यन्तु मर्हतीत्याहुर् यत् कृष्टञ्चाकृष्टञ्च भवत्यग्नेरुद्यत्या एतावन्तो वै पशवो द्विपादश्च चतुष्पादश्च तान्यत् प्राच उथ्सृजेद्रुद्रायापि दद्ध्याद्यद्दख्षिणा पितृभ्यो नि धुवेद्यत् प्रतीचो रख्षाꣳसि हन्युरुदीच उथ् सृजत्येषा वै देवमनुष्याणाꣳ शान्ता दिक् ॥ [२७] ॥ तामेवैनाननूथ् सृजत्यथो खल्विमान्दिशमुथ् सृजत्यसौ वा आदित्यः प्राणः प्राणमेवैनाननूथ् सृजति दख्षिणा पर्यावर्तन्ते स्वमेव वीर्यमनु पर्यावर्तन्ते तस्माद्दख्षिणोऽर्द्ध आत्मनो वीर्यावत्तरोऽथो आदित्यस्यैवाऽऽवृतमनु पर्यावर्तन्ते तस्मात् पराञ्चः पशवो वि तिष्ठन्ते प्रत्यञ्च आ वर्तन्ते तिस्रस्तिस्रः सीताः ॥ [२८] ॥ कृषति त्रिवृतमेव यज्ञमुखे वि यातयत्योषधीर् वपति ब्रह्मणाऽन्नमव रुन्धे ऽर्केऽर्कश्चीयते चतुर्दशभिर् वपति सप्त ग्राम्या ओषधयः सप्ताऽऽरण्या उभयीषामवरुद्ध्या अन्नस्यान्नस्य वपत्यन्नस्यान्नस्यावरुद्ध्यै कृष्टे वपति कृष्टे ह्योषधयः प्रतितिष्ठन्त्यनुसीतँव्वपति प्रजात्यै द्वादशसु सीतासु वपति द्वादश मासाः सँव्वथ्सरः सँव्वथ्सरेणैवास्मा अन्नम्पचति यदग्निचि ॥ [२९] ॥ दनवरुद्धस्याश्नीयादवरुद्धेन व्यृद्ध्येत ये वनस्पतीनाम्फलग्रहयस्तानिद्ध्मेऽपि प्रोख्षे दनवरुद्धस्यावरुद्ध्यै दिग्भ्यो लोष्टान्थ् समस्यति दिशामेव वीर्यमवरुद्ध्य दिशाँव्वीर्येऽग्निञ्चिनुते यन्द्विष्याद्यत्र स स्यात् तस्यै दिशो लोष्टमा हरेदिषमूर्जमहमित आ दद इतीषमेवोर्जन्तस्यै दिशोऽव रुन्धे ख्षोधुको भवति यस्तस्यान्दिशि भवत्युत्तरवेदिमुप वपत्युत्तरवेद्याꣳ ह्यग्निश्चीयतेऽथो पशवो वा उत्तरवेदिः पशूनेवाव रुन्धेऽथो यज्ञपरुषोऽनन्तरित्यै ॥ [३०] ॥

(च भवत्येतावद्वै पुरुषे वीर्यं यत्कृष्टश्चाकृष्टश्च दिख् सीता अग्निंचि द्व पञ्चविंशतिश्च) ॥ ५ ॥

अग्ने तव श्रवो वय इति सिकता नि वपत्येतद् वा अग्नेर् वैश्वानरस्य सूक्तꣳ सूक्तेनैव वैश्वा-
नरमव रुन्धे षड्भिर् नि वपति षड् वा ऋतवः संवँथ्सरः संवँथ्सरोऽग्निर् वैश्वानरः साक्षादेव
वैश्वानरमव रुन्धे समुद्रँव्वै नामैतच्छन्दः समुद्रमनु प्रजाः प्र जायन्ते यदेतेन सिकता निवपति
प्रजानाम्प्रजननायेन्द्रो ॥ [३१] ॥ वृत्राय वज्रम्प्राहरथ् स त्रेधा व्यभवथ् स्फ्य स्तृतीयꣳ रथ
स्तृतीयँय्यूप स्तृतीयँय्येऽन्तश्शरा अशीर्यन्त ताः शर्करा अभवन् तच्छर्कराणाꣳ शर्करत्वँव्वज्रो
वै शर्कराः पशुरग्निर्यच्छर्कराभिरग्निम्परिमिनोति वज्रेणैवास्मै पशून् परि गृह्णाति तस्माद्वज्रेण
पशवः परिगृहीतास्तस्माथ् स्थेयानस्थेयसो नोप हरते त्रिसप्ताभिः पशुकामस्य ॥ [३२] ॥
परि मिनुयाथ् सप्त वै शीर्षण्याः प्राणाः प्राणाः पशवः प्राणैरेवास्मै पशूनव रुन्धे त्रिणवाभिर्
भ्रातृव्यवतस्त्रिवृतमेव वज्रꣳ संभृत्य भ्रातृव्याय प्र हरति स्तृत्या अपरिमिताभिः परि मिनुया-
दपरिमितस्यावरुद्ध्यै यङ्कामयेतापशुः स्यादित्यपरिमित्य तस्य शर्कराः सिकता व्यूहेदपरिगृ-
हीत एवास्य विषूचीनꣳ रेतः परा सिञ्चत्यपशुरेव भवति ॥ [३३] ॥ यङ्कामयेत पशुमान्थ्
स्यादिति परिमित्य तस्य शर्कराः सिकता व्यूहेत् परिगृहीत एवास्मै समीचीनꣳ रेतः सिञ्चति
पशुमानेव भवति सौम्या व्यूहति सोमो वै रेतोधा रेत एव तद्दधाति गायत्रिया ब्राह्मणस्य गायत्रो
हि ब्राह्मण स्त्रिष्टुभा राजन्यस्य त्रैष्टुभो हि राजन्यः शय्ँयुम्बार्हस्पत्यम्मेधो नोपानमथ् सोऽग्नि-
म्प्राऽविशथ् ॥ [३४] ॥ सोऽग्नेः कृष्णो रूपङ्कृत्वोदायत सोऽश्वम्प्राऽविशथ् सोऽश्वस्यावान्तर-
शफोऽभवद् यदश्वमाक्रमयति य एव मेधोऽश्वम्प्राऽविशत् तमेवाव रुन्धे प्रजापतिनाऽग्निश्चेतव्य
इत्याहुः प्राजापत्योऽश्वो यदश्वमाक्रमयति प्रजापतिनैवाऽग्निञ्चिनुते पुष्करपर्णमुप दधाति योनिर्
वा अग्नेः पुष्करपर्णꣳ सयोनिमेवाग्निञ्चिनुतेऽपाम्पृष्ठमसीत्युप दधात्यपाँव्वा एतत् पृष्ठँय्यत् पुष्क-
रपर्णꣳ रूपेणैवैनदुप दधाति ॥ [३५] ॥

(इन्द्रः पशुकामस्य भवत्य विशथ् सयोनि विंशतिश्च) ॥ ६ ॥

ब्रह्म जज्ञानमिति रुक्ममुप दधाति ब्रह्ममुखा वै प्रजापतिः प्रजा असृजत ब्रह्ममुखा एव तत् प्रजा यजमानः सृजते ब्रह्म जज्ञानमित्याह तस्माद् ब्राह्मणो मुख्यो मुख्यो भवति य एवँवेद ब्रह्मवादिनो वदन्ति न पृथिव्यान्नान्तरिक्षे न दिव्यग्निश्चेतव्य इति यत् पृथिव्याञ्चिन्वीत पृथिवीꣳ शुचाऽर्पयेन्नौषधयो न वनस्पतयः ॥ [३६] ॥ प्र जायेरन्यदन्तरिक्षे चिन्वीतान्तरिक्षꣳ शुचाऽर्पयेन्न वयाꣳसि प्र जायेरन्यद्दिवि चिन्वीत दिवꣳ शुचाऽर्पयेन्न पर्जन्यो वर्षेद्रुक्ममुप दधात्यमृतँवै हिरण्यममृत एवाग्निञ्चिनुते प्रजात्यै हिरण्मयम्पुरुषमुप दधाति यजमानलोकस्य विधृत्यै यदिष्टकाया आतृण्णमनूपदद्ध्यात् पशूनाञ्च यजमानस्य च प्राणमपि दद्ध्याद् दक्षिणतः ॥ [३७] ॥ प्राञ्चमुप दधाति दाधार यजमानलोकन्न पशूनाञ्च यजमानस्य च प्राणमपि दधात्यथो खल्विष्टकाया आतृण्णमनूप दधाति प्राणानामुथ्सृष्ट्यै द्रप्स श्चस्कन्देत्यभि मृशति होत्रास्वेवैनं प्रति ष्ठापयति स्रुचावुप दधात्याज्यस्य पूर्णाङ्कार्ष्मर्यमयीन्दद्ध्नः पूर्णामौदुंबरीमियँवै कार्ष्मर्यमय्यसावौदुंबरीमे एवोप धत्ते ॥ [३८] ॥ तूष्णीमुप दधाति न हीमे यजुषाऽऽप्तुमर्हति दक्षिणाङ्कार्ष्मर्यमयीमुत्तरामौदुंबरीं तस्मादस्या असावुत्तराऽऽज्यस्य पूर्णाङ्कार्ष्मर्यमयीँवज्रो वा आज्यँवज्रः कार्ष्मर्यो वज्रेणैव यज्ञस्य दक्षिणतो रक्षाꣳस्यप हन्ति दद्ध्नः पूर्णामौदुंबरीम्पशवो वै दद्ध्यूर्गुदुंबरः पशुष्वेवोर्जन्दधाति पूर्णे उप दधाति पूर्णे एवैनं ॥ [३९] ॥ ममुष्मिँल्लोक उप तिष्ठेते विराज्यग्निश्चेतव्य इत्याहुः स्रुग् वै विराड् यथ् स्रुचावुपदधाति विराज्येवाग्निञ्चिनुते यज्ञमुखेयज्ञमुखे वै क्रियमाणे यज्ञꣳ रक्षाꣳसि जिघाꣳसन्ति यज्ञमुखꣳ रुक्मो यद्रुक्मवँव्याघारयति यज्ञमुखादेव रक्षाꣳस्यप हन्ति पञ्चभिर् व्याघारयति पाङ्क्तो यज्ञो यावानेव यज्ञस्तस्माद्रक्षाꣳस्यप हन्त्यक्ष्णया व्याघारयति तस्मादक्ष्णया पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै ॥ [४०] ॥

(वनस्पतयो दक्षिणतो धत्त एनं तस्मादक्ष्णया पञ्च च) ॥ ७ ॥

स्वयमातृण्णामुप दधातीयँवै स्वयमातृण्णेमामेवोप धत्तेऽश्वमुप घ्रापयति प्राणमेवास्यां दधात्यथो प्राजापत्यो वा अश्वः प्रजापतिनैवाग्निञ्चिनुते प्रथमेष्टकोपधीयमाना पशूनाञ्च यजमानस्य च प्राणमपि दधाति स्वयमातृण्णा भवति प्राणानामुथ्सृष्ट्या अथो सुवर्गस्य लोकस्यानु-

ख्यात्या अग्नावग्निश्चेतव्य इत्याहुरेष वा ॥ [४१] ॥ अग्निर् वैश्वानरो यद्ब्राह्मणस्तस्मै प्रथमामि-
ष्टकाय्यँजुष्कृताम्प्र यच्छेत् ताम्ब्राह्मण श्चोप दद्ध्यातामग्नावेव तदग्निश्चिनुत ईश्वरो वा एष आर्ति-
मार्तोर् योऽविद्वानिष्टकामुपदधाति त्रीन्वरान् दद्यात् त्रयो वै प्राणाः प्राणानाꣳ स्पृत्यै द्वावेव देयौ
द्वौ हि प्राणावेक एव देय एको हि प्राणः पशुर् ॥ [४२] ॥ वा एष यदग्निर् न खलु वै पशव आय-
वसे रमन्ते दूर्वेष्टकामुप दधाति पशूनान्धृत्यै द्वाभ्यां प्रतिष्ठित्यै काण्डात्काण्डात् प्ररोहन्तीत्याह
काण्डेनकाण्डेन ह्येषा प्रतितिष्ठत्येवा नो दूर्वे प्र तनु सहस्रेण शतेन चेत्याह साहस्रः प्रजापतिः
प्रजापतेराप्त्यै देवलक्ष्मव्वै त्र्यालिखिता तामुत्तरलक्ष्माणन्देवा उपादधताधरलक्ष्माणमसुरा
यं ॥ [४३] ॥ कामयेत वसीयान्थ् स्यादित्युत्तरलक्ष्माणन्तस्योप दद्ध्याद्वसीयानेव भवति
यङ्कामयेत पापीयान्थ् स्यादित्यधरलक्ष्माणन्तस्योप दद्ध्यादसुरयोनिमेवैनमनु परा भावयति
पापीयान् भवति त्र्यालिखिता भवतीमे वै लोकास्त्र्यालिखितैभ्य एव लोकेभ्यो भ्रातृव्य मन्त-
रेत्यङ्गिरसः सुवर्गँल्लोकय्यँतः पुरोडाशः कूर्मो भूत्वाऽनु प्रासर्प ॥ [४४] ॥ यत् कूर्ममुपद-
धाति यथा क्षेत्रविदञ्जसा नयत्येवमेवैनङ्कूर्मः सुवर्गँल्लोकमञ्जसा नयति मेधो वा एष पशूनाय्यँत्
कूर्मो यत् कूर्ममुपदधाति स्वमेव मेधम्पश्यन्तः पशव उप तिष्ठन्ते श्मशानव्वा एतत् क्रियते
यन्मृतानाम्पशूनाꣳ शीर्षाण्युपधीयन्ते यज्जीवन्तङ्कूर्ममुपदधाति तेनाश्मशानचिद्वास्तव्यो वा
एष यत् ॥ [४५] ॥ कूर्मो मधु वाता ऋतायत इति दद्ध्ना मधुमिश्रेणाभ्यनक्ति स्वदयत्ये-
वैनङ्ग्राम्यव्वा एतदन्नय्यँद्दद्ध्यारण्यम्मधु यद्दद्ध्ना मधुमिश्रेणाभ्यनक्त्युभयस्यावरुद्ध्यै मही द्यौः
पृथिवी च न इत्याहाऽऽभ्यामेवैनमुभयतः परि गृह्णाति प्राञ्चमुप दधाति सुवर्गस्य लोकस्य समष्ट्यै
पुरस्तात् प्रत्यञ्चमुप दधाति तस्मात् ॥ [४६] ॥ पुरस्तात् प्रत्यञ्चः पशवो मेधमुप तिष्ठन्ते यो
वा अपनाभिमग्निञ्चिनुते यजमानस्य नाभिमनु प्र विशति स एनमीश्वरो हिꣳसितोरुलूखलमुप
दधात्येषा वा अग्नेर् नाभिः सनाभिमेवाग्निञ्चिनुतेऽहिꣳसाया औदुंबरम्भवत्यूर्ग् वा उदुंबर ऊर्ज-
मेवाव रुन्धे मद्ध्यत उप दधाति मद्ध्यत एवास्मा ऊर्जन्दधाति तस्मान् मद्ध्यत ऊर्जा भुञ्जत
इयद्भवति प्रजापतिना यज्ञमुखेन संमितमव हन्त्यन्नमेवाकर् वैष्णव्यर्चोप दधाति विष्णुर् वै यज्ञो
वैष्णवा वनस्पतयो यज्ञ एव यज्ञम्प्रति ष्ठापयति ॥ [४७] ॥

(एष वैपशुर् य मसर्प देष यत्तस्मात् तस्माथ् सप्तविꣳशतिश्च) ॥ ८ ॥

एषाँव्वा एतल्लोकानाञ्ज्योतिः संभृतय्यँदुखा यदुखामुपदधात्येभ्य एव लोकेभ्यो ज्योतिरव रुन्धे मद्ध्यत उप दधाति मद्ध्यत एवास्मै ज्योतिर् दधाति तस्मान्मद्ध्यतो ज्योतिरुपाऽऽस्महे सिकताभिः पूरयत्येतद् वा अग्नेर् वैश्वानरस्य रूपꣳ रूपेणैव वैश्वानरमव रुन्धे यङ्कामयेत रुक्षोधुकः स्यादित्यूनान्तस्योप ॥ [४८] ॥ दद्ध्यात् रुक्षोधुक एव भवति यङ्कामयेतानुपदस्य दन्नमद्यादिति पूर्णान्तस्योप दद्ध्यादनुपदस्य देवान्नमत्ति सहस्रव्वै प्रति पुरुषः पशूनायँच्छति सहस्रमन्ये पशवो मद्ध्ये पुरुषशीर्षमुप दधाति सवीर्यत्वायोखायामपि दधाति प्रतिष्ठामेवैनद्गमयति व्यृद्धव्वा एतत् प्राणैरमेद्ध्यय्यँत् पुरुषशीर्षममृतङ्खलु वै प्राणा ॥ [४९] ॥ अमृतꣳ हिरण्यम्प्राणेषु हिरण्यशल्कान् प्रत्यस्यति प्रतिष्ठामेवैनद्गमयित्वा प्राणैः समर्द्धयति दद्ध्ना मधुमिश्रेण पूरयति मधव्योऽसानीति शृतातङ्क्येन मेद्ध्यत्वाय ग्राम्यँव्वा एतदन्नय्यँद्दद्ध्यारण्यं यद् दद्ध्ना मधुमिश्रेण पूरयत्युभयस्यावरुद्ध्यै पशुशीर्षाण्युप दधाति पशवो वै पशुशीर्षाणि पशूनेवाव रुन्धे यङ्कामयेतापशुः स्यादिति ॥ [५०] ॥ विषूचीनानि तस्योप दद्ध्याद्विषूच एवास्मात् पशून् दधात्यपशुरेव भवति यङ्कामयेत पशुमान्थ् स्यादिति समीचीनानि तस्योप दद्ध्याथ् समीच एवास्मै पशून् दधाति पशुमानेव भवति पुरस्तात् प्रतीचीनमश्वस्योप दधाति पश्चात् प्राचीनमृषभस्यापशवो वा अन्ये गोअश्वेभ्यः पशवो गोअश्वानेवास्मै समीचो दधात्येतावन्तो वै पशवो ॥ [५१] ॥ द्विपादश्च चतुष्पादश्च तान्वा एतदग्नौ प्र दधाति यत् पशुशीर्षाण्युपदधात्यमुमारण्यमनु ते दिशामीत्याह ग्राम्येभ्य एव पशुभ्य आरण्यान् पशूञ्छुचमनूथ् सृजति तस्माथ् समावत् पशूनां प्रजायमानानामारण्याः पशवः कनीयाꣳसः शुचा ह्यृताः सर्पशीर्षमुप दधाति यैव सर्पे त्विषिस्तामेवाव रुन्धे ॥ [५२] ॥ यथ् समीचीनम्पशुशीर्षैरुपदद्ध्याद् ग्राम्यान् पशून् दꣳशुकाः स्युर् यद्विषूचीनमारण्यान्यजुरेव वदेदव तान्त्विषिꣳ रुन्धे या सर्पे न ग्राम्यान् पशून्हिनस्ति नाऽऽरण्यानथो खलूपधेयमेव यदुपदधाति तेन तान्त्विषिमव रुन्धे या सर्पे यद्यजुर् वदति तेन शान्तम् ॥ [५३] ॥

(ऊनान्तस्योप प्राणाः स्यादिति वै पशवो रुन्धे चतुश्चत्वारिꣳशच्च) ॥ ९ ॥

पशुर् वा एष यदग्निर्योनिः खलु वा एषा पशोर् वि क्रियते यत् प्राचीनमैष्टकाद्यजुः क्रियते रेतोऽपस्या अपस्या उप दधाति योनावेव रेतो दधाति पञ्चोप दधाति पाङ्क्ताः पशवः पशूनेवास्मै प्र जनयति पञ्च दख्षिणतो वज्रो वा अपस्या वज्रेणैव यज्ञस्य दख्षिणतो रख्षाꣳस्यप हन्ति पञ्च पश्चात् ॥ [५४] ॥ प्राचीरुप दधाति पश्चाद् वै प्राचीनꣳ रेतो धीयते पश्चादेवास्मै प्राचीनꣳ रेतो दधाति पञ्च पुरस्तात् प्रतीचीरुप दधाति पञ्च पश्चात् प्राचीस्तस्मात् प्राचीनꣳ रेतो धीयते प्रतीचीः प्रजा जायन्ते पञ्चोत्तरत श्छन्दस्याः पशवो वै छन्दस्याः पशूनेव प्रजातान्थ् स्वमायतनमभि पर्यूहत इयँव्वा अग्नेरतिदाहादबिभेथ् सैता ॥ [५५] ॥ अपस्या अपश्यत् ता उपाधत्त ततो वा इमान्नात्यदहद्यदपस्या उपदधात्यस्या अनतिदाहायोवाच हेयमददिथ् स ब्रह्मणाऽन्नय्यँस्यैता उपधीयान्तै य उ चैना एवव्वेँददिति प्राणभृत उप दधाति रेतस्येव प्राणान् दधाति तस्माद्वदन् प्राणन् पश्यञ्छृण्वन् पशुर् जायतेऽयम्पुरो ॥ [५६] ॥ भुव इति पुरस्तादुप दधाति प्राणमेवैताभिर्दाधारायन्दख्षिणा विश्वकर्मेति दख्षिणतो मन एवैताभिर् दाधारायम्पश्चाद्विश्वव्यचा इति पश्चाच्चख्षुरेवैताभिर्दाधारेदमुत्तराथ् सुवरित्युत्तरतः श्रोत्रमेवैताभिर् दाधारेयमुपरि मतिरित्युपरिष्टाद्वाचमेवैताभिर्दाधार दशदशोप दधाति सवीर्यत्वायाख्ष्णयो ॥ [५७] ॥ प दधाति तस्मादख्ष्णया पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै याः प्राचीस्ताभिर् वसिष्ठ आर्ध्नोद् या दख्षिणा ताभिर् भरद्वाजो याः प्रतीचीस्ताभिर् विश्वामित्रो या उदीचीस्ताभिर् जमदग्निर् या ऊर्ध्वास्ताभिर् विश्वकर्मा य एवमेतासामृद्धिव्वेँदर्ध्नोत्येव य आसामेवम्बन्धुताव्वेँद बन्धुमान् भवति य आसामेवक्लृप्तिव्वेँद कल्पते ॥ [५८] ॥ ऽस्मै य आसामेवमायतनव्वेँदाऽऽयतनवान् भवति य आसामेवम्प्रतिष्ठाव्वेँद प्रत्येव तिष्ठति प्राणभृत उपधाय सय्यँत उप दधाति प्राणानेवास्मिन् धित्वा सय्यँद्भिः सय्यँच्छति तथ् सय्यँताꣳ सय्यँत्त्वमथो प्राण एवापानन्दधाति तस्मात् प्राणापानौ सञ्चरतो विषूचीरुप दधाति तस्माद् विष्वञ्चौ प्राणापानौ यद् वा अग्नेरसय्यँत ॥ [५९] ॥ मसुवर्ग्यमस्य तथ् सुवर्ग्योऽग्निर् यथ् सय्यँत उप दधाति समेवैनय्यँच्छति सुवर्ग्यमेवाक स्त्र्यविर् वयः कृतमयानामित्याह वयोभिरेवायानव रुन्धेऽयैर् वयाꣳसि सर्वतो वायुमतीर् भवन्ति तस्मादयꣳ सर्वतः पवते ॥ [६०] ॥

(पश्चा देताः पुरो ऽख्ष्णया कल्पते ऽसय्यँतं पञ्चत्रिꣳशच्च) ॥ १० ॥

गायत्री त्रिष्टुब् जग॑त्यनुष्टुक् पङ्क्त्या॑ सह। बृहत्यु॑ष्णिहा॑ ककुथ् सूचीभि॑ः शिम्यन्तु त्वा॥ द्विपदा॑ या चतु॑ष्पदा त्रिपदा॑ याच षट्पदा। सछन्दा॑ या च विच्छ॑न्दाः सूचीभि॑ः शिम्यन्तु त्वा॥ महाना॑म्नी रेवत॑यो विश्वा॑ आशा॑ः प्रसूव॑रीः। मेघ्या॑ विद्युतो॑ वाच॑ः सूचीभि॑ः शिम्यन्तु त्वा॥ रजता हरि॑णीः सीसा॑ युजो॑ युज्यन्ते कर्म॑भिः। अश्व॑स्य वाजिन॑स्त्वचि सूचीभि॑ः शिम्यन्तु त्वा॥ नारी॑ ॥ [६१] ॥ स्ते पत्न॑यो लोम वि चि॑न्वन्तु मनीषया॑। देवानाम्पत्नी॑र् दिश॑ः सूचीभि॑ः शिम्यन्तु त्वा॥ कुविदङ्ग यव॑मन्तो यव॑ञ्चिद्यथा दान्त्य॑नुपूर्वव्वि॑यूय॑। इहेहै॑षाङ्कृणुत भोज॑नानि ये बर्हिषो नमो॑वृक्तिन्न जग्मुः ॥ [६२] ॥

(नारी॑ स्त्रिꣳशच्च)

॥ ११ ॥

क स्त्वा॑ च्छ्यति क स्त्वा वि शा॑स्ति क स्ते गात्रा॑णि शिम्यति। क उ ते शमिता कविः॥ ऋतव॑ स्त ऋतुधा पर॑ः शमितारो वि शा॑सतु। सँव्वथ्सरस्य धाय॑सा शिमी॑भिः शिम्यन्तु त्वा॥ दैव्या॑ अद्ध्वर्यव॑स्त्वा च्छ्यन्तु वि च॑ शासतु। गात्रा॑णि पर्व॑शस्ते शिमा॑ः कृण्वन्तु शिम्य॑न्तः॥ अर्द्धमासाः परू॑ꣳषि ते मासा॑ श्छन्तु शिम्य॑न्तः। अहोरात्राणि॑ मरुतो विलि॑ष्टꣳ ॥ [६३] ॥ सूदयन्तु ते॥ पृथिवी तेऽन्तरि॑क्षेण वायु श्छिद्रम्भि॑षज्यतु। द्यौ स्ते नक्ष॑त्रैः सह रूपङ्कृ- णोतु साधुया॥ शन्ते पर॑भ्यो गात्रे॑भ्यः शमस्त्ववरे॑भ्यः। शमस्थभ्यो॑ मज्जभ्यः शमु ते तनुवे॑ भुवत् ॥ [६४] ॥

(विलि॑ष्टं त्रिꣳशच्च)

॥ १२ ॥

समाप्ति कोर्वैः

(विष्णु॑मुखा अन्न॑पते याव॑ती वि वै पुरुषमात्रेणा ग्ने तव श्रवो वयो ब्रह्म जज्ञानङ्ग् स्वयमातृण्णा मेषाव्वै पशुर् गा॑यत्री कस्त्वा द्वाद॑श)

(विष्णु॑मुखा अप॑चितिमान् वि वा एता वग्ने तव॑ स्वयमातृण्णां विषूचीना॑नि गायत्री चतु॑ष्षष्टिः)

(विष्णु॑मुखा स्तनुवे॑ भुवत्)

॥ हरिः ॐ ॥

पञ्चमकाण्डे द्वितीयः प्रश्नः समाप्तः

अनुवाकाः	पञ्चशत्यः
१२	६४

ॐ